# संस्कृतवार्ता:

दिनाङ्क : 27/08/2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- केन्द्रीय-मन्त्रिमण्डलेन अद्य प्रधानमन्त्री- स्ट्रीट-वेंडर्स-आत्मनिर्भर-निधि-योजनायाः पुनर्गठनम् अनुमोदितम्।
- कटरायाः वैष्णोदेवीमन्दिरमार्गे आपदुद्धरणकार्याणि सजवगत्या जायमानानि सन्ति, दुर्घटनामालक्ष्य प्रधानमन्त्री नरेन्द्रमोदी दुःखं प्रकटितवान्।
- रक्षामन्त्रिणा राजनाथ-सिंहेन प्रोक्तं यत् विश्वं भारतं सामर्थ्याय न अपितु सत्य-शान्ति-न्यायस्य च कृते समर्पणाय सम्मानयति।
- अशेषे हि देशे गणेशचतुर्थ्याः पारम्परिकोल्लासः सोत्साहेन समारब्धः।

---------------------------------------------

<u>मन्त्रिपरिषद्-पीएमस्वनिधिः</u>

केन्द्रीय-मन्त्रिमण्डलेन अद्य प्रधानमन्त्री- स्ट्रीट-वेंडर्स-आत्मनिर्भर-निधि-योजनायाः पुनर्गठनम् अनुमोदितम्। मन्त्रिमण्डलेन अस्याः योजनायाः ऋणावधिः चतुर्विंशत्यधिक-द्विसहस्रतमस्य दिसम्बरमासस्य **एकत्रिंश-द्दिनाङ्कात्** त्रिंशदधिक-**द्विसहस्र-तमस्य** मार्चमासस्य **एकत्रिंश-द्दिनाङ्कं** यावत् समेधितुं अनुमतिः प्रकटिता। योजनायाः अस्याः आहत्य परिव्ययः **द्वात्रिंश-दधिक**-त्रिशतोत्तर-**सप्तसहस्रकोट-रुप्यात्मकः** वर्तते।

पुनर्गठितयोजनायां प्रथमद्वितीयदेयमूल्ययोः ऋणवृद्धिः, ऋणपरिशोधकेभ्यः यूपीआई-लिंक-क्रेडिटकार्ड इत्येतयोः प्रावधानम्,सूक्ष्मविक्रयव्यवहाराय, समूहविक्रयव्यवहाराय च डिजिटल-कैशबैक्-प्रोत्साहनम् इत्येते विषयाः सम्मेलिताः ।

---------------------------------------------

<u>जम्मूकश्मीर-वैष्णोदेवी</u>

जम्मू-कश्मीरस्थ कटरानगरस्य वैष्णोदेवीमार्गे गतदिने प्रचण्डवृष्ट्या दुरापन्नेन भूस्खलनेन नैके जनाः अपमृत्युं अवाप्नुवन् । सुरक्षाप्रवर्तकैः व्रणिताः कटरायाः सामुदायिक-स्वास्थ्यकेन्द्रे प्रापिताः। सुरक्षाबलेन तत्र मार्गे बद्धेभ्यः तीर्थयात्रिभ्यः अपि आवश्यकचिकित्सोपकरणानि प्रापितानि। केंद्रीयमन्त्री डॉ. जितेन्द्रसिंहः अवोचत् यत् जम्मूनगरे तवी-नद्याः जलस्तरः न्यूनो जातः, किन्तु चिनाबनदी साम्प्रतमपि विपत्तिचिह्नस्य समीपे प्रवहति । एकस्मिन् सोशल-मीडियासन्देशे असौ प्रावोचत् यत् एसडीआरएफ-एनडीआरएफ- अर्धसैनिकबलानि,स्थलीयसैन्यबलानि, वायुदलसैनिकाश्च, नागरिकप्रशासनेन सह रक्षाभियाने प्रवृत्तास्सन्ति।

तेन इदमपि प्रोक्तं यत् स्थितिमालक्ष्य सः निरन्तरं जम्मूनगरस्य संभागीयायुक्तेन रमेश-कुमारेण सह सम्पर्करतो विद्यते।

अमुना विज्ञापितं यत् विद्यालयेभ्यः महाविद्यालयेभ्यश्च स्थगनादेशः प्रसारितः सहैव सामान्यजनानां सुरक्षार्थं अनावश्यक-गमनागमनस्य परिहारोऽपि परामृष्टः।

प्रधानमन्त्रिणा प्रोदीरितं यत् प्रशासनं सामान्यजनानां सहायतायै निरतमस्ति । जम्मू-कश्मीरस्य उपराज्यपालेन मनोजसिन्हा इत्यमुना मृतकानां परिवारेभ्यः संवेदना व्यक्तीकृता। सहैव अधिकारिभ्यः व्रणितानां सहायतायै अपि निर्देशो दत्तः।

---------------------------------------------

## राजनाथ-प्रतिरक्षा

अद्य रक्षामंत्री राजनाथ सिंह: अवोचत् यत्, अप्रत्याशित- भू-राजनैतिक-स्थिर्तिं दृष्ट्या सर्वप्रकाराणां सुरक्षा-समस्यानां कृते सशस्त्रसेनाः सज्जाः भवेयुः इति। मध्यप्रदेशस्य महू-नगरस्य सेना-युद्धमहाविद्यालये रणसंवादस्य भाषणे सः अवदत् यत्, भारतस्य पुरतः समस्याः अधिका: सन्ति, वरम् अस्माकं साहस: इतोऽपि दृढ: वर्तते। सः अवदत् यत् विश्वं न केवलं अस्माकं बलस्य कृते अपितु सत्यशान्त्यर्थं न्यायार्थं च कृते , अस्माकं समर्पणस्य कृते अपि अस्मान् आदृयते।

सम्मेलने एकत्रितानां रक्षाबलानां कृते सुरक्षायाः नीतयः च इत्येतयोः विविधान् आयामान् अवगन्तुं आह्वानम् अकरोत्। । श्रीसिंह: राष्ट्रस्य रक्षणे उदीयमानानां तन्त्रज्ञानानां निर्णायकभूमिकां दृढीकृतवान्।

---------------------------------------------

## गणेश-चतुर्थी

गणेशचतुर्थ्याः उत्सवः अशेषे हि देशे अतीव हर्षोल्लासेन समाचर्य्यते। दिवसोऽयं भगवतः गणेशस्य जन्मप्रतीकत्वेन प्रथितो विद्यते। दशदिवसं यावत् जायमानस्य उत्सवस्य अयं आरम्भसूचकः विनाचतुर्थीत्वेन गणेशोत्सवत्वेन चानुष्ठीयते। अत्रावसरे जनाः स्वगृहेषु मृत्तिकया गणेशप्रतिमां निर्मान्ति तस्याश्च पूजाञ्च विदधति। राष्ट्रपति-पदासीना द्रौपदी मुर्मूः प्रधानमन्त्री नरेन्द्रमोदी च अवसरेऽस्मिन् समेभ्यः देशवासिभ्यः शुभकामनां प्रकल्पितवन्तौ।

---------------------------------------------

## जम्मू-कश्मीर

जम्मू-प्रदेशे प्रचण्डवृष्ट्या उत्तररेलमार्गस्य पंचचत्वारिंशत् रेलयानानि निरस्तीकृतानि। अवधेयास्पदं वर्तते यत् पंचविशति: रेलयानानि च अल्पकालं यावत् स्थगितानि। । अद्य नव-दिल्ल्यां एकस्मिन् जन संचार पटले उत्तर-रेलमार्गस्य मुख्य-जनसम्पर्क-अधिकारी अवदत् यत् जम्मू-तवी, श्री-माता-वैष्णोदेवी-कटरा, पठान्केट्, नव-दिल्ली-रेल्स्थानकेषु सहायिका-पीठस्य स्थापना कृता अस्ति इति। जम्मू-नगरस्य कृते सहायिका-सेवा **सप्त अष्ट अष्ट अष्ट अष्ट त्रीणि नव नव एकम् एकम्** , दिल्ली-नगरस्य कृते **नव सप्त एकम् सप्त षट् त्रीणि अष्ट सप्त सप्त पञ्च एकम्** च अस्ति।

---------------------------------------------

## शाह-महादेवाभियानम्

केन्द्रीयगृहमन्त्रिणा अमितशाहेन प्रोक्तं यत् 'ऑपरेशन-सिन्दूर', 'ऑपरेशन-महादेव' इत्येताभ्यां आतङ्कवादीनां कृते स्पष्टः सन्देशः प्रदत्तः । श्रीशाहः अद्य भारतीयसेनायाः, जम्मू-कश्मीर-

आरक्षिबलस्य सीमा-सुरक्षा-बलस्य च वीरसैनिकैः सह मेलनं कृत्वा तान् सम्मानितवान् । अस्मिन् अवसरे असौ प्रोक्तवान् यत् 'ऑपरेशन-सिन्दूर' इत्यनेन जनेभ्यः सन्तुष्टिः दत्ता, परन्तु 'ऑपरेशन-महादेव' इत्यनेन सा सन्तुष्टिः आत्मविश्वासत्वेन परिवर्तिता ।

---

**पञ्जाब-जलाप्लावः**

पञ्जाबे जलाप्लावस्य स्थितिः गुरुतरावस्थां प्राप्नोति। रावी-व्यास-सतलुजनदीनां प्रवाहः तीव्रतरो जातः येन विपद्ग्रस्तेभ्यः जनपदेभ्यः सञ्चेतना निस्सारितास्ति। रणजीतसागरसेतुबन्धात् पौंग-भाखड़ासेतुबन्धाच्च नियन्त्रितमात्रायां जलविमोचनेनापि स्थितिः गभीरा दृश्यते।

सर्वेषामपि अधिकारिणाम् अवकाशः अगस्तमासस्य त्रिंशद्दिनाङ्कं यावत् निरस्तीकृतः। पठानकोट-गुरदासपुर-फाज़िल्का-फिरोज़पुर-कपुरथला इत्येतान् समेत्य सप्तजनपदानि उच्चसञ्चेतनायां वर्तन्ते।

।। इति वार्ता ।।